„ of the Comm. Harihara Agnihotri.

Begins (Text) — fol. 1*b*

अथातो गृह्यस्थालीपाकानां कर्म etc. as in No. 374/1883-84

Begins (Comm.) — fol. 1*b*

श्रीगणेशाय नमः ॥

अथ गृह्यसूत्रहरिहरभाष्य लिख्यते ॥

इष्टापूर्त्तक्रियासिद्धिहेतुं यज्ञभुजां मुखं etc. as in No. 39/1868-69

fol 80b अग्निहोत्रिहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ प्रथमः कांडः समाप्तः । १ ।छ॥

fol. 155b इत्यग्निहोत्रिहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ द्वितीयः कांडः समाप्तः ॥२॥ छ ॥

Ends (Text) — fol. 224a

मे मनसि तिष्ठतु ।

Ends (Comm.) — fol. 224a

अथ परिशिष्टो पृष्टो दिविविधानं लिख्यते etc, upto पाकमभीयादिति ॥१५॥ as in No. 39/1868-69 followed by इत्यग्निहोत्रिहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ तृतीयः कांडः समाप्तः ॥३॥ समाप्तश्चायं ग्रंथः ॥ स्वस्ति श्रीसन्नृपविक्रमार्क्कसमयातितः यावत् संवत् १८०० षर्षे शालिवाहन शाके १६६६ प्रवर्त्तमाने भावनाम संवत्सरे उदगयने ग्रीष्मऋतौ महामांगल्यफलप्रदज्येष्टमासे कृष्णपक्षे नवम्यां गुरुवासरे पूर्वाभद्रपदनक्षत्रे प्रीतियोगे तैतलकरणे मिथुनलग्ने एवं पंचांगे ॥ अद्येह श्रीसिंहपुरवास्तव्यं - उदीच्यसहस्रज्ञातीय - पंड्या - भारद्वाज - तत्सुनु -मधुसुदन-तत्सुत-महावजी-तत्सुनु - हरिकृष्णसुतपंडा - हरिसुतपंड्या - देवाकरसुतरत्नेश्वरेण लिखितं ॥ आत्मपठनार्थं ॥ शुभं भवतु ॥ लेखकपाठकयोर्मंगलं ॥ यादृशं पु० ॥१॥ तैलाद्रक्षे —छ॥छ॥

Reference — See No. 39/1868-69

पारस्करगृह्यसूत्र with व्याख्यान (प्रयोगपद्धति)	Pāraskaragṛhyasūtra with Vyākhyāna (Prayogapaddhati)

No. 672 — 13 / 1883-84

Size — 9⅞ in. by 4⅝ in.

Extent — 72 leaves; 12 lines to a page: 45 letters to a line.

Description — Country paper; Devanāgarī characters; old and musty in appearance; handwriting small, clear, legible and uniform; borders ruled in triple black lines; red pigment used for the text; edges worn out; yellow pigment occasionally used for

corrections; folios numbered in right-hand margins; foll. 1–3 and 30–79 missing; the Ms. contains both Text and Commentary on Kāṇḍas 1–3; incomplete.

Age. — Appears to be old.

Author. of the Text. — Pāraskara
„ of the Comm. — Harihara

Begins (Text) — fol. 4*a*

दायाद्यकाल एकेषां etc.

Begins (Comm.) abruptly — fol. 4*a*

...ग्निसंस्कारस्य पारस्कराचार्येण पृथगभिधानात्। तत्संस्कारसंस्कृतोग्निरौपासनः ॥ दायाद्यकाल एकेषां । एकेषामाचार्याणां मते दायाद्यकालेभ्रातॄणां पित्र्यधनविभागकाले अविभक्ते हि पित्र्ये धने सर्वेषां भ्रातॄणां स्वत्वस्य साधारणत्वेन वितियोगार्द्धनर्हत्वात्। धनविनियोगसाध्यं हि आवसथ्यादिकर्मानुष्ठानम्। etc.

fol. 84*b* इत्यग्निहोत्रीहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यान पूर्विकायां प्रयोगपद्धतौ द्वितीयः कांडः ॥

Ends (Text) — fol. 125*b*

चक्षुः श्रोत्रं यशो बलं यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठत्विति ।

Ends (Comm.) — fol. 125*b*

अस्यार्थः ॥ प्रतीकं मुख मे मम विवक्षणं साधुशब्दोच्चारणसमर्थं मे मभि जिव्हा यद्वचो मधुरसवत् तद्वचत्विति शेषः । एवमभीप्सितः शेषः सर्वत्र पूरणीयः । कर्णाभ्यां भुरि बहु शुश्रुवे श्रृणुयां । अहं मा त्वं । हार्षी मयि विषये यत् श्रुतं अधीतं पठीतं वर्त्तते तत्वं मा

Reference — see No. 39/1868–69

पारस्करगृह्यसूत्र-प्रयोगपद्धति

Pāraskaragṛhyasūtra-prayogapaddhati

No. 673

30
1891–95

Size — 10⅞ in. by 5⅛ in.

Extent — 53 leaves; 9 lines to a page; 36 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting not quite clear on many folios; borders ruled in two double black lines; red pigment used for marking; edges extremely worn out; folios being torn pasted with paper-slips; most of the folio-numbers are not clearly seen as the edges are worn out; folios not in proper order; the Ms. begins and ends abruptly.

Age — Appears to be fairly old

Author — Harihara Agnihotri

Begins. abruptly — fol. (?)

...तिरौद्रस्तं पशुं छागं आलभते संज्ञपयति । कथंभूतंम् । सांडम् । अंडाभ्यां सह वर्त्तत इति सांडस्तम् ॥ अनपुंसकमित्यर्थः ॥

fol. ...a इत्यग्निहोत्रीहरिहरविरचितायां पारस्करगृह्यसूत्रे व्याख्यानपूर्विकायां प्रयोग पद्धतौ प्रथमः कांडः ॥१॥

fol. 132a इत्यग्निहोत्रीहरिहरविरचितायां...द्वितीयः कांडः ॥२॥

Ends. abruptly — fol. 170b

अथ पद्धतिः

तत्र स्वर्गादीनामन्यतमफलप्राप्तिकामकार्त्तिक्यां पौर्णमास्य...युजस्य रेवत्यां वा ॥ शास्त्रांतराच्चैत्र्यामाश्वयुज्यां व मातृपूजाभ्युदयिकश्राध्दे विधाय गे...मत्वा गवां मध्ये पंचभूसंस्कारान् कृत्वावसथ्याग्नि

Reference — See No. 39/1868-69

पारस्करगृह्यसूत्रभाष्य Pāraskaragṛhyasūtrabhāṣya

No. 674 28/1870-71

Size — 10¼ in. by 4¼ in.

Extent — 26 leaves; 11 lines to a page; 45 letters to a line.

Description — Country paper; Devanāgarī characters with पृष्ठमात्रास; very old in appearance; handwriting clear, legible and uniform; borders ruled in double black lines with red pigment on them; edges extremely worn out and moth-eatan; red pigment used for marking; folios numbered in right-hand margins; the Ms.

contains commentary on Pāraskaragṛhyasūtra-kāṇḍa 7 and some portion of Kāṇḍa II; incomplete.

Same as No. 78/A1881-82

Age — Fairly old

Author — Karkopādhyāya

Begins — fol. 1*b*

ॐ नमो विनायकाय श्रीगणपतये कात्यायनाय च ॥ श्रौतान्याधानादीन्युक्तानि कर्म्माणि तदनंतरं स्मार्त्तान्यनुविधीयंते ॥ तत्रैतदादिसूत्रं । etc. as in No. 78/A1881-82

fol. 16*b* इति कर्कोपाध्यायकृतौ गृह्यभाष्यकांडं प्रथमं ॥

Ends abruptly — fol. 26*b*

एवमादिभिस्त्रिभिर्म्मंत्रैः तिस्र आहुतयः । सर्वं आहुतामेके कपालं ध्रुवाय भौमाय स्वाहेति । स्थालीपाकधानासक्तूभ्यः स्विष्टकृत । प्राशनांते सक्तूनामेकदिश ९ सूर्पेन्युत्योपनिः क्रम्य बहिः शालायास्थंदिलमुपलिप्योक्तायां ध्रियमाणायांमांतरागमनेन्युक्त्वा वाः तः । सर्प्पो न वने जथत्याग्नेयपांडुपार्थिवानां मित्येभिर्म्मंत्रैः । शेषं निगदव्याख्या

पारस्करगृह्यसूत्रभाष्य — Pāraskaragṛhyasūtrabhāṣya

No. 675 — 77 / A/1881-82

Size — 9½ in. by 4¼ in.

Extent — 74 leaves; 9 lines to a page; 45 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting beautiful, clear and legible but not quite uniform; red pigment used; folios numbered in both margins; foll. 48, 50 & 52 are yellowish in appearance; modern paper used for foll. 53-56; the Ms. contains Commentary on 2nd Kāṇḍa of Pāraskaragṛhyasūtra.

Age. — Not very old

Author. — Gadādhara, son of Vāmana Dīkṣita

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥छ॥

चूडाकरणमाह सांवत्सरिकस्य चूडाकरणं

संवत्सरो जातो यस्य स सांवत्सरिकः तस्य बालकस्य चूडाकरणं चूडाकरणाख्यं कर्म कुर्यादिति शेषः चूडाकरणमिति वक्ष्यमाणसंस्कारकर्मणो नामधेयं तृतीये वाऽप्रतिहते अथवा तृतीये संवत्सरे अप्रतिहते अपूर्णे असमाप्ते चूडाकरणं कुर्यात् etc.

fol. 6*b* इति श्रीत्रिरग्निचित्संम्राटस्थपतिश्रीमद्दायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीये कांडे प्रथमकंडिका ?

fol. 16*b* इति ..... द्वितीया कंडिका २

Ends — fol. 73*b*

ततस्त्रियो भार्यादिका उपयजेरं बलिहरणं कुर्युरिंद्रादिभ्योन्येभ्यश्च क्षेत्रपालादिदेवताभ्यो वृद्धव्यवहारेण । कुतः आचरितत्वात् । प्राचीनाभिः कृतत्वात् बलिकर्मणः संस्थिते कर्मणि ब्राह्मणां भोजयेद्ब्राह्मणान्भोजयेत् । समाप्ते स्त्रीकर्तृकबल्यनंतरं त्रीन्ब्राह्मणान्भोजयेत् । द्विरभ्यासः कांडसमाप्तिसूचनार्थः इति श्रीमत्संम्राट्वामनात्मज-दीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकांडं समाप्तं ॥ then follows अथ पदार्थक्रमः

fol. 74*b* इति श्रीरग्निचित्संम्राट्वामनाचार्यस्थपतिमद्दायाज्ञिक वामनात्मज दीक्षित गदाधरकृते सीतायज्ञे पदार्थक्रमः समाप्तं द्वितीयकांडं ।

Reference — (1) Mss. -A-Aufrecht's Catalogus Catalogorum:- i, 334*b*; ii, 74*b*, 210*a*; iii, 71*b*

B-Descriptive Catalogues:-R. Mitra, Notices, No. 832.

(2) Printed Editions:-Commentary on two Kāṇḍas has been published in the Chowkhamba Sanskrit series, 1925.

पारस्करगृह्यसूत्रभाष्य — Pāraskaragṛhyasūtrabhāṣya

No. 676 — 78 / A/1881-82

Size — 9⅝ in. by 4¼ in.

Extent — 37 leaves; 10 lines to a page; 45 letters to a line.

Description —Smooth country paper; Devanāgarī characters; not very old in appearance; handwriting clear legible and uniform; borders ruled in two double black lines; folios numbered

in both margins; the Ms. contains Commentary on the Pāraskaragṛhyasūtra, Kāṇḍas 1–3.

Age — Saṁvat 1858

Author. — Karkopādhyāya

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥

॥ पारस्करकृतस्मार्त्तसूत्रव्याख्या गुरूक्तितः ।
कर्कोपाध्यायकेनेयं तेने नत्वा जगद्गुरुम् ॥

श्रौतान्याधानादीनि कर्माण्युक्तानि । तदनंतरं स्मार्त्तान्यनुविधीयते । तत्रैतदादिमं सूत्रम् ॥ अथातो गृह्यस्थालीपाकानां कर्म्मेति । व्याख्यास्यत इति सूत्रशेषः । तत्रायमथशब्द आनतर्ये । श्रौतानुविधानसमनंतरं स्मार्त्तान्यनुविधीयंते इति । etc.

fol. 15*b* इति श्रीकर्कोपाध्यायकृते गृह्यभाष्ये प्रथमकांडविवरणं संपूर्णम् ॥

fol. 2 *b* इति कर्को (पा) ध्यायकृते गृह्यभाष्ये द्वितीयं कांडं समाप्तम् ॥

Ends fol. 37*a*

अथोपतिष्ठते सं मा सिंदंतु मरुता । सप्तैत्रः सं बृहस्पतिः । संग्यथमग्निः सिंचतु प्रजया व धनेन चेति । अनेन मंत्रेण । १२ । अथातः सभाप्रवेशनमित्येवमादि यत्तत्सर्वं निगदव्याख्यातमेव ॥१३॥

इति श्रीकर्कोपाध्यायकृतं गृह्यसूत्रटिप्पणं संपूर्णम् ॥ इति श्रीसंवत् १८५८ मी. भादौ वदि एकम१र्वासोमा२ संमाप्त ॥ श्रीगुरगोविंद नारायनजी सहाय ॥ श्रीसीव ॥

Reference — Mss.-A-Aufrecht's Catalogus Catalogorum :-i, 334*b*; ii, 210*a*; iii, 71*b*

पारस्करगृह्यसूत्रभाष्य Pāraskaragṛhyasūtrabhāṣya

No. 677 $\frac{21}{1884-86}$

Size — $9\frac{7}{8}$ in. by $4\frac{3}{8}$ in.

Extent — 86 leaves; 18 lines to a page; 48 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting small but clear, legible and uniform;

borders ruled in double black lines; red pigment used for marking; yellow pigment used for corrections; edges of some of the folios slightly worn out; folios numbered in both margins; the Ms. contains Kāṇḍas 1 and 2; separate pagination for each.

Age — Saṁvat 1773

Author — Gadādhara, son of Vāmana

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

आविर्भूतश्चतुर्द्धा यः कपिभिः परिवारितः ॥
हतवान् राक्षसानीकं रामं दाशरथिं भजे ॥१॥

स्वाभिप्रायेण हि मया न किंचिदिह लिख्यते ॥
किं तु वाचनिकं सर्वमतो ग्राह्यं च निर्भयैः ॥२॥

अथातोधिकार इत्यादिना श्रौतानि कर्मण्युक्तानि तदनंतरं स्मार्त्तानि विधीयंते॥ तत्रैतत्प्रथमं सूत्रं ॥ अथातो गृह्यस्थालीपाकानां कर्म । उच्चत इति सूत्रशेषः ॥ etc.

fol 58*b* ॥ इति श्रीसम्राट्वामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडं समाप्तं ॥ श्रीविश्वेश्वरार्पणमस्तु ॥ संवत् १७३३ पराभवनाम संवत्सरे आषाढमासे शुक्लपक्षे अष्टमीमंदवासरे केशवभट्टेन लिखित ॥ श्रीराम ॥

Ends — fol. 28*b* (86*b*)

संस्थिते कर्मणि ब्राह्मणान्भोजयेद् ब्राह्मणान्भोजयेत् ॥ समाप्ते स्त्रीकर्तृबल्यनंतरं त्रीन्ब्राह्मणान्भोजयेत् । द्विरभ्यासः कांडसमाप्तिसूचनार्थः ॥

इति श्रीसम्राट्वामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीय कांड समाप्तं ॥ अथ पदार्थक्रमः ।

..... इदं भीमाभ्यो वायुसमजवेभ्यः । चर्वोराज्यस्य च मिश्रणं । तेन लांगलयोजनं देवताभ्यः इंद्रादिभ्योनुमत्यंतेभ्यो बलिहरणं । ततो बलिपटलकेन स्त्रियश्च बलिहरणं कुर्युरिंद्रादिभ्योन्येभ्यश्च क्षेत्रपालादिदेवताभ्यो वृद्धाचारेण । ततो ब्राह्मणभोजनं ॥

इति श्रीत्रिरग्निचित्संम्राट्स्थपतिश्रीमद्दायाज्ञिकवामनात्मजदीक्षितगदाधर कृते सीतायज्ञे पदार्थक्रमः ॥ समाप्तं द्वितीयंकांडं ॥ संवत् १७७३ पराभव संवत्सरे श्रावणवदि पंचमी गुरुवासर केशवेन लिखितं ॥

Reference — See No. 77 / A1881-82

पारस्करगृह्यसूत्रभाष्य Pāraskaragṛhyasūtrabhāṣya

No. 678 59/1895-1902

Size — 12½ in. by 5¾ in.

Extent — 42 leaves; 9 lines to a page; 30 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting bold and careless but clear and legible; folios numbered in both margins; edges slightly worn out; moth-eaten; incomplete.

Age — Appears to be old

Author — Gadādhara

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥ श्रीराम प्रसन्न ॥

आदिभूतश्चतुर्धा यः कपिभिः परिवारितः ॥
हतवान्राक्षसानीकं रामं दाशरथिं भजे ॥
स्वाभिप्रायेण हि मया न किंचिदिह लिख्यते ॥
किंतु वाचनिकं सर्वमतो ग्राह्यं च निर्भयैः ॥

अथातोधिकार इत्यादिना श्रौतकर्माण्युक्तानि तदनंतरं स्मार्त्तानि विधीयंते ॥ तत्रैतत्प्रथमं सूत्रं अथातो गृह्यस्थालीपाकानां कर्म ॥ गृह्यः शालाग्निः तत्र ये स्थालीपाकास्ते गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म क्रियंतेति ॥ etc.

Ends — fol. 42*a*

हे छत्र त्वं बृहस्पत पितामहस्य छदिः धर्मादिनिवर्तकोसि प्रथमं ॥ अतः पाप्मनो निषिद्धाचरणात् मां अंतर्देहि अंतर्हितं कुरु ॥ तेजसश्च सकाशात् मांतधेहि मा व्यहितं कुरु तद्युक्तं कुर्वित्यर्थः ॥ प्रतिष्ठेस्थो विश्वतो मा पातमित्युपानहौ प्रतिमुंचते ॥ मंत्रार्थः ॥ हे उपानहौ देवते यवां प्रतिष्ठा स्थितिहेतुस्थः भवतः अतो विश्वतः सर्व

रामकृष्ण मोरेश्वर पाठकस्येदं पुस्तकं ॥ गदाधरभाष्य

Reference — See No. 77 / A1881-82

पारस्करगृह्यसूत्रभाष्य called सज्जनवल्लभ

Pāraskaragṛhyasūtrabhāṣya called Sajjanavallabha

No. 679

85
1880–81

Size — 9⅝ in. by 4⅜ in.

Extent — 75 leaves; 12 lines to a page; 36 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting clear and legible but not uniform; borders of the first 43 folios only ruled in two double black lines; folios numbered in both margins; the Ms. contains a commentary on the Kāṇḍas 1–3 of Kātyāyanagṛhyasūtra,

Age — Saṁvat 1872 : Śaka 1737

Author — Jayarāma

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥

श्रीमत्केशववाग्गणाधिपपदद्वंद्वप्रभाभासुर etc.

as in No. 512/1882–83

Ends — fol. 74*b*

अंगानि गात्राणि मे ममाप्यायंतां वर्द्धंतां etc. upto भाष्यं सज्जनवल्लभं जययुजा रामेण मत्यै शुभं ॥ as in No. 512/1882–83 followed by इति श्रीमत्कातीयगृह्यभाष्ये सज्जनवल्लभाष्ये जयरामकृतौ तृतीयकाण्डस्य भाष्यं संपूर्णम् ॥ श्रीरस्तु ॥ मंगलं ददातु ॥ संवत् १८७२ शाके १७३७ लिखितं ब्राह्मणसना ..... शिवदत्तशुक्ल काशीमध्ये लिखायतं गुरूदलपतजी आत्मपठनार्थम् ॥ शुभं भूयात्

Reference — See No. 512/1882–83

पारस्करगृह्यसूत्रमन्त्र-भाष्य

Pāraskaragṛhyasūtramantra-bhāṣya

No. 680

2
1872–73

Size — 8½ in. by 3⅝ in.

Extent — 78 leaves; 8-9 lines to a page; 30 letters to a line.

Description — Country paper; Devanāgarī characters with [illegible]; old in appearance; handwriting small but clear, legible and uniform; borders ruled carelessly in double black lines; red pigment used for marking edges; worn out and moth-eaten; folios numbered in right-hand margins; foll. 78–91 missing; the Ms. contains commentary on the mantras in Pāraskaragṛhyasūtra Kāṇḍas 1-2 and some portion of Kāṇḍa 3; incomplete.

Age — Appears to be very old

Author — Murārī Miśra

Begins — fol. 1*b*

ॐ नमो भगवते वासुदेवाय ॥

प्रणम्य पूर्वं पुरुषं पुराणं तथैव कात्यायनपादपद्मं ।
तनोति पारस्करमंत्रभाष्यं मुरारिमिश्रः पितृगृह्यभाष्यात् ।
गृह्यप्रकाशाभिधभाष्यगर्भाच्छ्रीवेदमिश्रैर्विधिवत्प्रणीतात् ।
आकृष्य मंत्र विदधाति बंधुं मुरारिमिश्रः श्रुतितो विविच्य ।
त्वं नो अग्न इत्यादि । त्वं नः सत्वं न इति etc.

fol. 51*a* इति प्रथमकांडस्य मंत्रार्थः समाप्तः ॥

fol. 75*a* इति श्रीवेदमिश्रप्रणीतगृह्यप्रकाशाख्यान्महाभाष्यादुद्धृत्य तमुरारिमिश्रकृत-द्वितीयं कांडं मंत्रभाष्यं समाप्तं ॥

Ends abruptly — fol. 92*b*

तेनेमं प्रियेण गार्हपत्या गार्हपत्ये द्वे आहुती जुहोति । उक्तमंतः पशवो नियम्यंते । एकांते इह यज —

References — Mss. — A–Aufrecht's Catalogus Catalogorum :- i, 334*b*; ii 74*b*; 210*a*; iii, 71*b*

B–Descriptive Catalogues :- Ulwar Mss. Cat. 137 Extr. 41.

पारस्करगृह्यसूत्र-व्याख्यान

Pāraskaragṛhyasūtra-vyākhyāna

No. 681

38
1886-92

Size — 8¾ in. by 3 9/16 in.

Extent — 196 leaves; 8 lines to a page; 25 letters to a line.

Description — Country paper; Devanāgarī characters; not old in appearance; handwriting clear and legible but not uniform; borders of foll. 124 onwards upto the end ruled in double red lines and edges in single red lines: folios numbered in both margins; fol. 14 repeated; the Ms. contains commentary on the 2nd and 3rd Kāṇḍas of Pāraskaragṛhyasūtra.

Age — Śaka 1746 Śaṁvat 1882.

Author — Agnihotri Harihara

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

अथ चूडाकरणकेशांतौ तंत्रेण सूत्रयति ॥

सांवत्सरीकस्य चूडाकरणं तृतीये वा प्रतिहते संवत्सरमब्द अतिक्रांतः सांवत्सरिकः ॥ तस्य कुमारस्य चूडाकरणं चूडाकर्म्म कुर्यात् तृतीये वा संवत्सरे ॥ अप्रतिहते अल्पावशिष्टे ॥ यथा मंगल वा सर्वेषां ॥ यद्वा यथामंगलं यथाकुलाचारं ॥ एतदुक्तं भवति ॥ etc.

fol 101*a* इत्यग्निहोत्रीहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ द्वितीयः कांडः समाप्तः ॥

Ends — fol. 195*a*

यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु ।
यन्मे मम श्रुतं मीमांसादि अधीतं सृगादितत्पुरुत्सर्वं
मे मनसि तिष्ठतु स्थिरां भवतु । अत्र वीप्सा अथ
भूयस्त्वप्रतिपादनार्थं ग्रंथसमाप्तिज्ञापनार्थं वा । १५ ॥

इत्यग्निहोत्रीहरिहरर्चितायां पारस्करसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ तृतीयकांडः समाप्तः ॥१॥

अथ पृष्टोदिविविधानं ॥ अथ परिशिष्टोक्तं प्रष्टोदिविविधानं वक्ष्यामि..... पंचमहायज्ञपिंडपितृयज्ञाद्याग्रयणादि कुर्यात् । मणिकावधानादि सर्वं आवसथ्याधानादिवत् ॥ अनुदिने च होमः । इति परिशिष्टोक्तं पृष्टोदिविविधानं । इत्यग्निहोत्रीहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां पद्धतौ तृतीयकांडं समाप्तोः ॥ संवत १८।८२ का शके १७/४६ का मासानां उत्तममासे पुरुषोत्तममासे शुभे शुक्लपक्षे चतुर्दश्यां गुरुवासरे कृत्यगानामनक्षत्रे साध्य नाम योगे व्यणव्यनामकरणे थनलग्नोयं समाप्तोसिर्म्यहं श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्री ॥

Reference — See No. 39/1868–69

पितृभक्ति
(यजुर्वेदीयश्राद्धविधि)

Pitṛbhakti
(Yajurvediyaśrāddhavidhi)

No. 682

34
1899-1915

Size — 12⅝ in. by 4¾ in.

Extent — 25 leaves; 12 lines to a page; 50-55 letters to a line.

Description — Country paper; Devanāgarī characters; not old in appearance; handwriting clear, legible and uniform; borders ruled in two double black lines; red pigment used for marking certain words of the text; yellow pigment often used for corrections; edges being torn pasted with paperslips; moth eaten in the left-hand margins; folios numbered in both margins; complete.

Age — Does not appears to be very old

Author — Śrīdatta

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥

कातीयकल्पं सहकर्कभाष्यं भूपालगोपालमतादिदृष्ट्वा
सतां च वाक्यानि निशम्य संस्यग्यजुर्विदां श्राद्धविधिं विधास्ये १ ।

किं पुनरिदं श्राद्धं नाम पितृदेवताकस्त्याग इति चेत् न तर्पणे पिंडपितृयज्ञे च गतत्वात् ब्राह्मणभोजन इति चेत् न । शूद्रश्राद्धाव्यापनात् ॥ अत्र कल्पतरुकारः । पितृनुदिश्य द्रव्यत्यागो ब्राह्मणसीकारपर्यंतः श्राद्धमित्याह । etc.

fol 15*b* इति महामहोपाध्याय-श्रीश्रीदत्तविरचितायां पितृभक्तौ श्राद्धकल्पे निर्णयाध्यायः संपूर्णः प्रथमः ॥

Ends — fol. 25*a*

नांदीमुखान्पितॄन् वाचयिष्ये इति पृष्ट्वा वाच्यतामित्युनुज्ञातो नांदीमुखाः पितरः पितामहाः प्रपितामहाः मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयंतामित्युक्ते प्रीयंतामिति ब्राह्मणैरुच्यमाने ऊर्जवहंतीरिति वारिधारा दत्वा पिंडानां घ्रायोप्त्याप्यदर्भानुल्मुकं च वन्हौ निःक्षिप्यार्घयाजमुत्रानीकृत्य दक्षिणां दत्वा विश्वे देवाः प्रीयंतामिति वाचयित्वा पंक्तिमूर्द्धन्यमंगुष्टे गृहीत्वा विसृज्य प्रदक्षीणीकृत्य गृहं प्रविश्योत्तरकर्म संयोदयेत् ॥

इति श्रीमहामहोपाध्याय - श्रीदत्तविरचितायां पितृभक्तौ संकीर्णाध्यायो द्वितीयः समाप्तः शुभस्तु ॥

References — Mss. - A-Aufrecht's Catalogus Catalogorum :-i, 337*b*.
B-Descriptive Catalogues :-R. Mitra, Notices No. 1924; Bik. Mss. Cat. No. 928.

पुण्याहवाचन

Puṇyāhavācana

No. 683

167
1880-81

Size — 8⅝ in. by 3⅝ in.

Extent — 10 leaves; 7 lines to a page; 20 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting somewhat careless but clear and legible; borders ruled in double black lines; red pigment used for marking; folios moth eaten; edges worn out; foll. 2, 3 missing; incomplete.

Age — Saṁvat 1768

Author — Not mentioned

Begins — fol. 1*b*

श्रीगणेशाय नमः । चतुर्वेदाय नमः ॥
संपूज्य गंधमाल्याद्यैर्ब्राह्म ... न् स्वस्ति वाचयेत् ।
धर्मकर्मणि मांगल्ये संग्रामाद्भूतदर्शने ।
पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एवदेव निरोंकारं कुर्या ... क्षत्रियवैश्ययोः ।
सोंकारं ब्राह्मणे कुर्या निरोंकारं महीपतौ ।
... शुचतया वै स्यस्वस्ति शूद्रं न कारयेत् । etc.

Ends — fol. 11*b*

वेदस्वस्ति ... घण स्वस्ति परशुर्वेदि परशुर्नः स्वस्ति । इविष्कृतोयं नीयायं-न्यकामास्ते देवासो ... जुषंतां ॥ पुन्याहवाचनस्मृद्धिरस्तु ॥ स्वस्ति संवत१७६८ वर्षे आखाडमासे क्रष्टपक्षे दशमीआं १० गुरुवासरे नटपहवास्तेव्यं अभ्यांतर-नागरन्यातीय ॥ वीरेश्वरगोपाल ल्यषितं ॥ श्रीचतुर्वेदेना आशीर्वाद सही वीरेश्वर स्वयं व्यषीते ॥श्री॥

पुरुषबोधिनी (आथर्वण) Puruṣabodhinī (Ātharvaṇa)

No. 684 29 / 1892-95

Size — 10 in. by 5¼ in.

Extent — 3 leaves; 12-13 lines to a page; 38 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting clear, legible and uniform; borders ruled in two double red lines on all sides; red pigment used for marking the colophons; yellow pigment used for corrections; folios numbered in both margins; edges worn out; leaves slightly brittle; the Ms. contains Prapāṭhakas 1-4.

Age — Appears to be old

Author — Not mentioned

Begins — fol. 1*b*

॥ श्रीराधाकांतो जयति ॥

ॐ अथ सुषुप्तौ रामः स्वबोधमाधाय इव किं मे देव कासौ कृष्णः योयं मम भ्रातेति तस्य का निष्ठा ब्रूहीति सा वै ह्युवाच राम शृणु। भूर्भुवः स्वर्महर्जनस्तपः सत्यं तलं वितलं सुतलं रसातलं तलातलं महातलं पातालमेवं पंचाशत्कोटियोजनबहुलं स्वर्णांडं ब्रह्मांडमिति। etc.

fol. 2*a* इत्याथर्वणि पुरुषबोधिन्यां पारमहंसे प्रथमः प्रपाठकः ॥१॥

fol. 2*b* इत्याथर्वणि पुरुषबोधिन्यां पारमहंस्ये द्वितीयः प्रपाठकः ॥२॥

Ends—fol. 3*b*

मानसपूजया जपेन। ध्यानेन ॥ कीर्त्तनेन ॥ स्तुतिमानसेन सर्वेण नित्यस्थर्कं प्राप्नोति नान्येनेति नान्येनेति ॥

इति वेदवचनं भवति ॥ इति वेदवचनं भवति ॥ इति वेदवचनं भवतीति ॥

इत्याथर्वणपुरुषबोधिन्यां पारमहंसो चतुर्थः प्रपाठकः ॥१॥

श्री ॥ शुभं भूयात् ॥१॥ श्री ॥२॥ श्रीरस्तु ॥१॥ श्री ॥१॥ कल्याणमस्तु॥२॥

पृथिवीपूजा Pṛthivīpūjā

No. 685 411 / 1883-84

Size — 12⅝ in. by 3⅞ in.

Extent — 2 leaves; 7 lines to a page; 40 letters to a line.

Description — Modern paper with watermarks; Devanāgarī characters; new in appearance; handwriting clear, legible and uniform; borders ruled in double red lines; folios numbered in both margins; complete.

Age — Modern

Author — Not mentioned

Subject — On the worship of earth.

Begins — fol. 1b

॥ श्रीगणेशाय नमः ॥

शुभे दिने सपत्नीको यजमानो गंधादिपूजासंभारान् गृहीत्वा ब्राह्मणैः सह मंगलघोषं कारयन् । करिष्यमाणदेवयजनभूमौ गत्वा शुचौ देशे पूजासंभारान्संस्थाप्य ॥ देशकालौ संकीर्त्य ॥ अस्यां भूमौ करिष्यमाणसाग्निचिदग्निष्टोमयज्ञांगभूतशालायतनकर्मणो निर्विघ्नतासिध्यर्थं गणपतिभूमिकूर्मानंतविश्वकर्मपूजां करिष्ये ॥ etc.

Ends — fol. 2b

अव्यक्ते चाहते पूर्णे शुभे चांगिरसः सुते ॥
इष्टदे त्वं प्रयच्छेष्टं त्वां प्रतिष्ठापयाम्यहं ॥६॥
देशस्वामिपुरःस्वामिग्रहस्वामिपरिग्रहे ॥
मनुष्यधनहस्त्यपशुवृद्धीकरी भव ॥

ततो गंधादिभिर्ब्राह्मणान्संपूज्य शिल्पिवर्गं पूजयेत् ॥ पृथिवी कूर्मानंतपूजाविधौ यन्यूनातिरिक्तं तत्सर्वं परिपूर्णतास्तु ॥ छ ॥ इति पृथिवीपूजा समाप्ता ॥ छ ॥ छ ॥ छ ॥

प्रयोगनिर्णय

Prayoganirṇaya

No. 686

14
1871-72

Size — 9½ in. by 4⅕ in.

Extent — 23 leaves; 12 lines to a page; 30–32 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting clear, legible and uniform; borders ruled in double red lines; red pigment used for marking; yellow pig-

ment used for corrections; folios numbered in both margins; the Ms. deals with different Saṁskāras from गर्भाधानप्रयोग to समावर्त्तन.

Probably a part of the author's larger work called Saṁskāranirṇaya.

Age — Appears to be old.

Author — Candracūḍa

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

प्रणिपत्य महादेवं चंद्रचूडेन धीमता ॥
संस्काराणां प्रयोगस्य निर्णयः प्रोच्यतेऽधुना ॥१॥

अथ गर्भाधानप्रयोगः ॥

चतुर्थदिनारभ्य षोडशाद्याद्युग्मेष्वेव दिवसेषु पतिः पूर्वेद्युर्नांदीश्राद्धं कृत्वा तद्दिने स्वस्तिवाचनं कृत्वा प्राणानायम्य देशकालौ संकीर्त्य इमां पत्नीं गर्भाधानेन कर्मणा स ५ स्करिष्य इति संकल्प्य ॥ रात्रौ रत्यर्थं सुवस्त्रां स्वलंकृतां सुगंधतांबूलादिना वासितवक्त्रां स्वशय्यामारूढां स्वयमपि तादृशो भूत्वा ॥

ॐ विष्णुर्योनिं कल्पयतु त्वष्टारूपाणि पि ५ शतु ॥
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥ etc.

Ends — fol. 23*b*

आदिष्टीनोदकं कुर्यादाव्रतस्य समापनं ॥
समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदिति

अदिष्टी ब्रह्मचारी ॥ यदि व्रतचर्ये कश्चिन्मृतस्तदानेति ॥ सत्यपि जननेनाशौचमिति ॥ क्रांताशौचाभावाविति दिक् ॥ इति समावर्त्तनं समाप्तम् ॥ छ ॥

प्रयोगपद्धति

Prayogapaddhati

No. 687

82
1895–1902

Size — 7⅝ in. by 5 in.

Extent — 78 leaves; 12 lines to a page; 20–25 letters to a line.

Description — Country paper; Devanāgarī characters; old in apperance; handwriting careless and not uniform but legible; borders

ruled in double red lines; red pigment used for the first few folios for marking; folios numbered in both margins; first few folios moth-eaten; edges worn out; foll. 11, 12, 73, 74 missing; white fol. 18 repeated; incomplete.

On fol. 1[a] we have स्मार्त्तगंगाधरिपद्धति.

Age — Saṁvat 1678

Author — Gaṅgādharabhaṭṭa

Subject — A sacrificial manual according to the Baudhāyana school.

Begins — fol. 1[b]

॥ श्रीगणेशाय नमः ॥

गणनाथं नमस्कृत्य शारदां गुरुमेव च ।
अधानपद्धतिं कुर्वे स्मार्त्तसंग्रहकारकां ॥१॥

वैकल्पीकानृषीं छंदो देवता यज्ञकर्मणि ॥
देवतानामभिध्यानं वक्ष्ये संकल्पपूर्वकं ॥२॥

आग्न्याधानं द्विजेंद्रेण कृतिका च विशाखयोः
रेवती रोहिणी पुष्य मृगज्येष्ठोत्तराश्रये ॥३॥

माघादिपंचमासेषु श्रावणे चाश्विने तथा
मार्गशीर्षेथवाधानं गृह्याग्नेश्च प्रशस्यते ॥४॥ etc.

fol. 15[b] इति गंगाधरभट्टविरचितायां स्मार्त्तः पदार्थसंग्रहे मणिकावधानं समाप्तं ॥

fol. 46[b] इति श्रीमद्यज्ञविद्याविशारदगंगाधरभट्टविरचितायां प्रयोगपद्धतौ उपाकर्म समाप्तं ॥

Ends — fol. 80[a]

ब्रह्मपुराणेति । ये लौकिकाग्नावज्ञानाद्वालस्यसंभवात् ।
विदेशे वा स्वदेशे वा भोजनाय नराधमाः ।

देशभंगप्रवासे वा व्याधिते व्यसनेथवा ।
अन्यस्मिन् केनचित्कार्य भोजनाय नराधमाः । इति दक्षः ।

स्मृतिसंग्रहे विष्णुकात्यायनौ ॥

दर्शे वा पौर्णमासे वा पराग्नौपाकसेवनात् ।
आधानं च कृतं नश्येतस्मात्तं परिवर्जयत् ॥

॥ इति श्रीमद्यज्ञविद्याविशारदगंगाधरभट्टविरचितायां प्रयोपद्धतौ पाकयज्ञसहितगृह्याग्न्याधानपद्धतिः समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीयज्ञनारायणार्पणमस्तु ॥ श्रीरस्तु ॥ शुभं भवतु ॥ ... ...

संवत् १६७८ घातानाम संवत्सरे भाद्रपदवद्य ७ सप्तमिवासरे सौम्यवासरे रोहिणिदिवसनक्षत्रे कन्यस्थिते चन्द्रे च शुर्यसि तुळे स्थिते देवगुरुवाहन

रघुनाथसूत दादापाठके कसबेपारणेर लिखितं आत्मकार्यार्थं परोपकार्यार्थत् ॥
यादृशं पुस्तकं ..... येवं वदति पुस्तकः ॥३॥छछ॥

Then follow some vorses.

References — Mss. – Aufrecht's Catalogus Catalogorum: – i, 355*b*; ii, 79*b*; 211*a*.

प्रासादप्रतिष्ठापद्धति Prāsādapratiṣṭhāpaddhati

No. 688 204 / 1902-07

Size —$9\frac{7}{16}$ in. by $4\frac{1}{8}$ in.

Extent — 20 leaves; 11 lines to a page; 32 letters to a line

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; borders ruled in double red lines; folios numbered in both margins; complete.

Age — Śaka 1700

Author — Not mentioned

Subject — Rites to be performed at the time of building a palace.

Begins — fol 1*b*

श्रीगणेशाय नमः ॥

अथ त्रैविक्रमीं ग्रंथांतरं चावलंब्य प्रासादप्रतिष्ठापद्धतिर्लिख्यते ॥ तत्र स्वयंभुवे देवे पूर्वप्रतिष्ठिते वा ॥ अदृश्यमाने प्रासादावये वा ॥ श्रद्धया शिलान्यासपूर्वकं पाषाणेऽष्टकादार्वादिभिर्नवं प्रासादं निर्माय सिद्धे प्रासादे ॥ स्वानुकूलेह्नि प्रासादादुत्तरतः पूर्वतः ईशाव्यां वा । द्वादशहस्तं दशहस्तं अष्टहस्तं वा मंडपं कृत्वा । तन्मध्य त्रिभागे वेदिकामापाद्य तस्याः परितः प्रतिष्ठायागवत् पंचकुंडानि etc.

Ends — fol. 20*b*

पूर्णाहुतिसामग्री नारीकेळादिवस्त्रादि वसोर्धारास्रुक् आरंभसमाप्तिपर्यंतं तूपमणसवामण अग्निजिव्हा १ भद्रासन १ अभिषेकार्थवस्त्रं ताम्रपात्र १ दर्भपेंढी ४ गोदानार्थं १ अश्व १ वृषभ १ ऋत्विक् दक्षिणा ब्राह्मणभोजनसाहित्य प्रासादसामग्री उद्यापन समाप्ता ॥ छ ॥

खखाद्रिक्ष्मामिते शाके श्रावणे शुक्लपक्षके ॥
त्रयोदश्यां गुरुवा ..... लिखच्छुभं ॥ १ ॥

बह्वृचगृह्यकारिका or शाकलकारिका

B. hvṛcagṛhvakārikā or Śākalakārikā

No. 689

43
1868-69

Size — 12⅜ in. by 8 in.

Extent — 37 leaves; 16 lines to a page; 36-38 letters to a line.

Description — Modern paper with watermarks; Devanāgarī characters; blue in appearance; handwriting clear, legible and uniform; borders ruled in double reddish lines; yellow pigment used for correetions; folios numbered in both margins; the Ms. contains the description of different kinds of religious rites; complete.

Age — Modern

Author — Śākalācārya

Begins — fol. 1b

श्रीगणेशाय नमः ॥ श्रीशाकलाचार्याय नमः ॥

शाकलोहं प्रयोगं च वक्ष्ये बव्हचकर्मणां ॥
कारिकायामनुक्तं यत्तदेव हि समंत्रकं १

आचार्यस्य च वै वाण्या सत्कर्माध्वप्रदर्शिनी ॥
प्रोच्यते कारिकेतीह सद्भिश्चैव तु लौकिके २

अपानपाणिपादस्य शोधनं शुद्धिकारकं ॥
सर्वेषामेव वर्णानामिदमादौ प्रचक्षते ३ etc.

Ends — fol. 37a

ब्रह्महत्यादि किं पापं ब्राह्मणः कुरुते यदि
स दोषपातनिरतः पतितः परिकीर्तितः ८

प्रमादाच्चेन्नवेदंगं पृथग्देहाद्द्विजस्य तु
तच्चैवाप्सु क्षिपेदंगं करणादांगुलादकं ९

एवंभूतस्य विप्रस्य मरणं जायते यदि
कुर्यात्तस्य सुतः कर्म प्रायश्चित्तपुरःस्सरं १०

तारयेद्यः पितृन्यापात्तथैवंतरति स्वयं
इत्येवे कथितो धर्म शाकलेन महर्षिणा १३११

इति श्रीशाकलाचार्यकृतकारिकायां शौचादि संन्यासां विधिप्रकरणं समाप्तं एवं ग्रंथस्तु ॥ ॥ छ ॥ छ ॥

अनुक्रमणिकापारंभ :

Then follows an index of the various topics dealt with in the Manuscript.

References — Mss. —A-Aufrecht's Catalogus Catalogorum :- i, 368[a]; ii 83[a]

B-Descriptive Catalogues :- R. Mitra Notices, No. 3244 (inc)

बौधायनधर्मशास्त्र(सूत्र) Baudhāyanadharmaśāstra (sūtra)

No. 690 6/1868-69

Size —14 in. by 5¾ in.

Extent — 28 leaves; 11 lines to a page; 52 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting clear, legible and uniform; borders ruled in two double black lines; red pigment used for marking coiophons; yellow pigment used for corrections; edges slightly worn out; folios numbered in both margins; the Ms. contains Praśnas 1-4.

Age — Appears to be old

Author — Bodhāyana

Subject — Dharmaśāstra

Begins — fol. 1[b]

॥ ॐ ॥ उपदिष्टो धर्मः प्रतिवेदं तस्यानुव्याख्यास्यामः स्यात्तो द्वितीयस्तृतीयः शिष्टागमः । शिष्टाः खलु विगतमत्सरा निरहंकाराः कुंभीधान्या अलोलुपा दंमदर्प्यलोभमोहक्रोधविवर्जिताः ।

धर्मेणाधिगतो येषां वेदः सपरिबृंहणाः ।
शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतव इति । etc.

fol. 2[a] इति धर्मशास्त्रे प्रथमोध्यायः ॥

fol. 2[b] इति द्वितीयः ॥

fol. 3[b] इति बौधायने धर्मशास्त्रे तृतीयोध्यायः ॥

Ends — fol. 28*b*

प्राजापत्यमिदं पुण्यं ऋषिणा समुदीरितं ।
इमध्यापयेन्नित्यं धारयेत् श्रुणुतेपि वा ।
मुच्यते सर्वपापेभ्यो ब्रह्मलोके महीयते ।
यान् सिसाधयिषुर्मंत्रान् द्वादशाहानि तान् जपेत् ।
घृतेन पयसा दध्ना प्राश्य निश्योदनं सकृत् ।
दशवारं तथा होमं सर्पिषा सवनत्रयं ।
पूर्वसेवा भवेदेषा मत्राणां कर्मसाधने इति ॥
अथातं संप्रवक्ष्यामि । प्रायश्चित्तानि वक्ष्यामः ॥
॥ इति बौधायने धर्मशास्त्रे चतुर्थः प्रश्नः ॥ छ ॥

References —(1)—A-Aufrecht's Catalogus Catalogorum :- i, 379*b*; ii, 85*b*; iii, 81*a*
See also P. V. Kane: Hist. of Dh. pp. 20–32.
B-Descriptive Catalogues :- Bikaner Mss. Cat. No. 989.

(2) Printed Editions :- Trans by Bühler in S. B. E. series Vol. XIV; Ed. by Hultzsah, Leipzig 1884, 1922; Ānandāśrama Sanskrit texts; Published in Mysore, Government Oriental series 1907, etc.

बौधायनविहारकारिका शुल्बकल्प

Baudhāyanavihārakārikā Śulbakalpa

No. 691

29
1883-84

Size — 8½ in. by 4½ in.

Extent — 3 leaves; 12 lines to a page; 32 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting careless but clear and legible; borders ruled in double black lines; edges worn out; folios numered in both margins; complete.

Age — Appears to be old

Author — Not mentioed

Begins — fol. 1[a]

श्रीगणेशाय नमः ॥

कथितं लक्षणं शुल्बकल्पे बौधायनीयके ।
वेद्यग्निधिष्टियानां च दर्शयज्ञे तदुच्यते ॥ १ ॥

अरत्निमात्रं विज्ञेयमग्नेरायतनं शुभं ।
षट्त्रिंशदंगुलायाम विंशत्यंगुलमेव वा ॥ २ ॥ etc.

Ends — fol. 3[a]

चतुसूत्रैर्भवेद्गेहं पैतृकाहवनीयकं
...दिशाननंऋत्यो रुक्कशौस्तः पदांतरे ॥ २७ ॥

एवं प्रयंचिता वेदिः पैतृकी शुल्बमानतः ॥ २८ ॥

॥ इति बौधायनविहारकारिका समाप्तः ॥ छ ॥ छ ॥
श्रीपार्वतीराजेश्वरप्रसन् ॥

बौधायनशुल्बमीमांसा — Baudhāyanaśulbamimāṁsā

No. 692 — 96 / 1891–95

Size — 8¼ in. by 4⅜ in.

Extent — 134 leaves; 8 lines to a page; 28 letters to a line.

Description — Modern paper; Devanāgarī characters; new in appearance; handwriting clear, legible and uniform; folios numbered in both margins; leaves slightly brittle; the Ms. contains Adhyāyas 1–3.

Age — Śaka 1814

Author — Vyaṅkaṭeśvara Dīkṣita

Subject — A commentary on the Baudhāyanaśulbasūtra

Begins — fol. 1[b]

श्रीगणेशाय नमः ॥

॥ कांतामुखं संततमंतिकस्थं यस्यावतंसेंदुरवेक्ष्यमाणः ॥
अवाप कार्श्यं किमु पांडुतां च ददातु देवः स सदा मुदं वः ॥ १ ॥

... ...

अबोधकत्वं निखिलेषु वेदेष्वपास्य ये विष्टपमन्वगृण्हन् ॥
सूत्रैर्विचित्रार्थचमत्कृतैस्तान् बोधायनाचार्यवरान् भजामः ॥ ६ ॥

भट्टोक्ततंत्रोद्धरणप्रवीणानद्वैतविद्यापरिपालने च ॥
नमामि गोविंदमखिप्रवेकात् भक्त्या मुहुः संप्रति तातपादान् ॥ ७ ॥

सर्वेषु तंत्रेषु समं स्वतंत्रश्रीयज्ञनारायणदीक्षितेंद्रः ॥
अध्यापयद्यं बहुधानवद्यां विद्यामशेषामनुजं यथावत् ॥ ८ ॥

बोधायनोक्तसूत्रं बुध्वा बहुशो विचार्य नयरीत्या ॥
श्रीवेंकटेश्वरमखी सुगमां मतनोति शुल्बमीमांसां ॥ ९ ॥

इह खलु भगवान् बोधायनाचार्य अग्निचयान् व्याख्यास्यन् शिष्टाचार-परिप्राप्तमथशब्दोच्चारणं मंगलं कुर्वन् शिष्यावधानार्थं लक्ष्यमाणार्थं प्रति-जानीते ॥ etc.

Ends. — fol. 134*b*

एवं च सार्धत्रयोविंशपुरुषप्रमाणो वाग्निश्चमेधे कर्तव्य इत्यर्थः । ननु पक्षद्वयाभिधानमविरुद्धमित्याशंक्य श्रुतिवाक्यद्वयवशात् विकल्पो युज्यत इत्यु-भयमुदाहरति । त्रिस्तावोग्निर्भवतीत्येकविंशोग्निर्भवतीत्युभयं ब्राह्मणमुभयं ब्राह्मणमिति । द्विरुक्तिरध्यायसमाप्तिद्योतनार्था ॥ २१ ॥

इति श्रीमद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्यसर्वपृष्ठा-सोर्यामयाजिश्रीयज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशस्य साग्निचित्याप्तवाजपेययाजिश्रीव्यंकटेश्वरदीक्षितस्य कृतिषु बोधायनशुल्बमीमां-सायां तृतीयोध्यायः ॥ ३ ॥ शके १८१४

References— Mss.—A–Aufrecht's Catalogus Catalogorum :-
i, 379*b*; iii, 81*a*.
B–Descriptive Catalogues :– I. O. Cat. No. 291.

बोधायनसूत्र — Bodhāyanasūtra

No. 693 — 75 / 1895-1902

Size — 10½ in. by 4⅝ in.

Extent — 194 leaves; 9 lines to a page; 35 letters to a line.

Description — Modern country paper; Devanāgarī characters; not very old in appearance; handwriting bold, clear, and legible; folios numbered in both margins; moth-eaten; white chalk

used for corrections; folios numbered as 1–123 and then 1–71; incomplete

Age — Not very old

Begins — fol. 1*b*

श्रीगणेशाय नमः

ॐ यथो ... द्धुतहुतः प्रहुतः शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति सप्त पाकयज्ञसंस्था इति ताश्च व्याख्यास्यामस्तत्र यध्दूयते स हुतो यथै-तद्विवाहः सीमंतोन्नयनं चेति तत्र हि हूयत एवाथ यद्धुत्वा दीयते etc.

fol. 15*a* गृह्ये प्रथमः प्रश्नः

fol. 32*b* इति द्वि(ती)यः प्रश्नः

Ends — fol. 193*b*

परेयुंवास इदं त्वावस्त्रमपैतदूहेमौ युनज्मि ते ख, वद्यन्वास्य पूषा त्वि-तश्च्यावयतु पूषेमा आशा आयुर्विश्वायुरपेत वीतेयं नार्युदीर्ष्व नारी सुवर्णहस्ता-चित्रं देवानां यच्चिद्धि ते यत्किंचे दंकितवासोभैनमग्ने श्रृतं यदाजोभागो य एतस्य न वायं वैत्वं प्रकेतुना नवाश्मन्वतीरे वतीर्यद्वे देवस्य सवितुः पवित्रं या राष्ट्रात्पन्नादुद्वयं तमसस्यरि धाता पुनातु विलोदकमुद्वयं पुरुषसंस्कारमंत्रग्रहणं विधुरो विधवा चैव दहेदुत्तपनाग्निना यतिश्च

ब्रह्मकल्प

Brahmakalpa

No. 694

250
Viśrāma (i)

Size — 8⅜ in. by 4½ in.

Extent — 13 leaves; 9 lines to a page; 30 letters to a line.

Description — Modern paper; Devanāgarī characters; new in appearance; handwriting clear, legible and uniform; folios numbered in right-hand margins; complete.

Age — Śaka 1747

Author — Not mentioned

Begins — fol. 1*b*

॥ श्रीगणाधिपतये नमः ॥ शुभमस्तु ॥

ब्रह्मसंकल्प ॥ अचिंत्यव्यक्तरूपाय अब्दादौ मित्र०
प्राङ्मुखः प्रयतो भूत्वा उत्तराभिमुखोपि च ॥
संवत्सरफलं सम्यक् श्रुवविप्राश्च दक्षिणं ॥ २ ॥

अथ सृष्टिक्रमं लिख्यते ॥ सर्वव्यापक अखंडदंडायमानजलं स्थित्वा । निर्गुणपरमात्मस्य लीलामात्रेण मायोपाधिवशं वर्तते ॥ etc.

Ends — fol. 12*b*

आदिनारायणस्य मुखे ॥ ब्राह्मण उत्पत्यः ॥ बाहोः क्षत्रियः हृदये वैश्यः ॥ पादौ शूद्रः ॥ तदनंतरे आष्टादशजातिः ॥ मनसे चंद्रमाः ॥ चक्षो सूर्यः मुखे इंद्राग्निः ॥ प्राणात् वायुः ॥ नाभ्यां अंतरिक्षः ॥ तदनंतरे श्रृष्टिचक्रभ्रमदः ॥ देवदैत्यमनुष्ययक्षपशुगंधर्वोरगादीनां नानाविधभूतसंभव उत्पत्यः ॥ एवं विराट् पुरुषो ब्रह्मकल्पो वक्ष्यंते ॥

गदग्देशकधिपतिगलाद अतिशूर जयंतीबाई वेंकपैय्यनवरुबरिशिद ब्रह्मकल्प शके १७४७ नेया प्रवर्तमाने पार्थिवसंवत्सरे उत्तरायने हिमंतऋतौ पुष्यशुद्ध ५ पंचमी स्थिरवारद्धितिप्रहरसमयदल्लि सोरटूरग्रामसरवारग्रहदचावडिमध्यदल्लि कुळुतु बरदातवायुनामकनु ॥ श्रीकृष्णार्पणमस्तु ॥ राम ॥ कृष्ण ॥ मुकुंद॥ मुरारे ॥ नारायण

ब्रह्मकूर्चविधि from अथर्ववेद

Brahmakūrcavidhi from Atharvaveda

No. 695 199 / 1880–81

Size — 8¾ in. by 4⅛ in.

Extent — 3 leaves; 6 lines to a page; 20 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting bold, clear, legible and uniform; borders ruled in double black lines; red pigment used for marking the verse-numbers; yellow pigment used for corrections; edges slightly worn out and moth-eaten; folios numbered in right-hand margins; complete.

38 th Pariśiṣṭa of the Atharvaveda.

Age — Appears to be old

Author — Not mentioned

Subject — On the performance of a penance called Brahmakūrca.

Begins — fol. 1*b*

श्रीरामचंद्राय नमः ॥

ब्रह्मकूर्चविधिं पुण्यं संक्षेपाद्वच्म्यसंशयं ॥
पावनानां परं यो हि पावनं तपसां तपः ॥ १

स्नात्वा शुचिः शुचौ देशे गोमयेनावसेविते ॥
वस्त्रेण संहिते वापी सितपुष्पैः प्रपूजिते ॥ २

अहोरात्रोषितः क्षांतः पवित्रात्मा प्रपावनः ॥
शुक्लवासाः सुगंधिः प्रागुपविष्टः कुशासने ॥ ३ etc

Ends — fol. 3[a]

अर्धमासेर्धमासे च ऋषीणां लोकमुत्तमं ॥
षड्रात्रे चैव षड्रात्रे ब्रह्मलोकमनामयं ॥ १८

अहरहः प्रयुंजानः परं ब्रह्माधिगच्छति ॥
अनेन विधिनैतद्यो देवतर्पणपूर्वकं ॥ १९

ब्रह्मणा निर्मितं ह्येतं पवित्रं परमं हितं
पवित्रं परमं हितमिति ॥२०॥

इत्यथर्ववेदे ब्रह्मकूर्चविधि समाप्तः ॥

रावलक्रीपारामभाइ मंच्छारामेण लषीतं रावलमांडणजी सुतकसनजी-पठनार्थं ॥ श्रीरघुवर जय

ब्रह्मकूर्चविधि or
पञ्चगव्यहोमविधि

Brahmakūrcavidhi or
Pañcagavyahomavidhi

No. 696

130
1892-95

Size — $6\frac{7}{8}$ in. by $4\frac{1}{8}$ in.

Extent — 6 leaves; 7 lines to a page; 24 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting bold, clear, legible and uniform; folios numbered in right-hand margins; complete.

Age — Not very old

Author — Not mentioned

Begins — fol. 1[b]

॥ श्रीमते रामानुजाय नमः ॥

स्नानं आचमनं प्राणायामं संकल्प पुन्यतिथौ श्रीभगवदाज्ञा भगवदकैंकार्थं पंचगव्यप्राशनं करस्यमाणतदंगब्रह्मकूर्चविधिना अग्निप्रतिष्टापनं कत्रस्ये संकल्पः etc.

Ends. — fol. 6a

आचमनं प्राणानायम्य तदगव्यं प्रणवेनो उधरेण तु प्रणवेन समालोढि-
प्रणवेनाभिमंत्रय च

प्रणवेन ततोधृत्य प्रणवेन च तत् पिबेत्
यत्वगस्थिगतं पाप देहे तिष्टति मामके
प्रासनं पंचगव्यस्य दहत्यग्निरिवेधनं
इति मंत्रं समुच्चारय स्वाचांतं प्रणवं तथा
सकृदुत्वा तु मंत्रांत पिबेत्तूष्णी पुनः पुनः
आचम्याग्निविर्म्स्प्रसि गायत्रीस्तु जपेस्तथा
आ ६ यांस्तं यथासक्तिः अयुतं वा सहस्रकं
अष्टोतासतं वा आष्टाविंसतिरेव च
नारायणं नमस्कृत्य सूर्यमंडलमधिगं
इती ब्रह्मकूर्चविधि वा पंचगव्यहोमविधि समाप्ता ॥ १ ॥

भारद्वाजसूत्र — Bhāradvājasūtra

No. 697 — 66 / 1886-92

Size — 11 in. by 5¼ in.

Extent — 30 leaves; 9 lines to a page; 48 letters to a line.

Description — Modern country paper; Devanāgarī characters; not very old in appearance; handwriting beautiful, clear, legible and uniform; borders ruled in two double black lines; folios numbered in both margins; fol. 1 missing; incomplete.

Age — Not very old

Author — Not mentioned

Begins abruptly — fol. 2a

...र्यं मयि गृण्हाम्यग्रे अग्निमिति द्वाभ्यामात्मन्नग्निं गृहीत्वोत्तरेणाग्निं पात्रेभ्यः स ९ स्तीर्य यथार्थं द्रव्याणि प्रयुनक्त्यश्मानमहंतं वासोऽजिनं मौजी-मेखलां त्रिवृतां ब्राह्मणस्य मौर्वीं राजन्यस्य सौत्रीं वैश्यस्य बैल्वं पालाशं वा दंडं ब्राह्मणस्य नैय्यग्रोधं राजंन्यस्यौदुंबरं etc.

fol. 12b इति चौलकर्म समाप्तं ॥

Ends abruptly — fol. 31b

उत्तरस्मिंकाल आगते होमश्चेदनिवृत्तः पूर्वस्य सेयं व्याधातिपत्तिस्तस्यां प्रायश्चित्तं मनो ज्योतिरिति पूर्वस्य हुत्वा परस्य जुहुयात्प्रतिहोममा दशरात्रा-

स्प्राणायामश्चैकादशीप्रभृति विंशतिरात्रादुपवासश्च त्रिंशद्रात्रादत ऊर्ध्वं मा षष्ठिरात्रात्तिस्रो रात्रीरुपवसेदत ऊर्ध्वं प्राजापत्यं विहितमेकादशीप्रभृति तिस्रश्च तंतुमतीस्तंतुं तन्वनुहु ध्य स्वाग्ने त्रयस्त्रिंशत्तंतव इत्युत्तमनुगतोपवासाश्चाग्नेसीति जुहुदा त्रिरात्रान्मनो ज्योतिरित्या सप्तरात्र्यादत ऊर्ध्वं द्वादशरात्र्यात्तिस्रो रात्रीरुपवसेदत ऊर्ध्वं प्राजपत्यं विहित एकादशीप्रभृति तिस्रश्च तंतुमती उक्तं द्वादशाहं विच्छि-

---

भाषिकवृत्ति

Bhāṣikavṛtti

No. 698

519
1882-83

Size — 7¾ in. by 4 in.

Extent — 12 leaves; 10-11 lines to a page; 25 letters to a line.

Description — Modern paper; Devanāgarī characters; new in appearance; handwriting clear, legible and uniform; red pigment used for marking the portion; folios numbered in right-hand margins; slightly moth-eaten at the edges; complete.

This is the only Ms. recorded by Aufreht in his Cat. Cat.

Age — Śaka 1713

Author — Mahāsvāmī

Begins — fol. 1[a]

॥ श्रीगणेशाय नमः ॥

उदात्तानुदात्तौ भाषिकस्तत्संधिः ॥ उदात्तश्चानुदात्तश्च उदात्तानुदात्तौ ॥ तयोः संधिरेकवर्णतेत्यर्थः । स संधिर्भाषिकसंज्ञो भवति ॥ व्यवहारार्थं संज्ञा क्रियते ॥ वक्ष्यति च भाषिके चोभयेषामिति ॥ etc.

Ends. — fol. 12[a]

अन्येषा शाखिनां येषां दृश्यते तेषां ब्राह्मणस्वरस्तान एव भवति । एक श्रुतिरित्यर्थः ॥ तान एवांगोपांगानां तानऽएवांगोपांगानामिति ॥ शिक्षा १ कल्पो २ व्याकरणं ३ निरुक्तं ४ छंदो ५ ज्योतिषमिति षडंगानि ॥ प्रतिपद १ मनुपद २ छंदो भाषा ३ धर्मो ४ मीमांसा न्याय ५ स्तर्क ६ इत्युपांगानि ॥ एतेषामंगानामुपांगानां तान एव स्वरो भवति ॥ द्विरभ्यासश्च शास्त्रपरिसमाप्त्यर्थः ॥ इति करणं चेति ॥ इति महास्वामिकृता भाषिकवृत्तिः ॥

श्रीशालिवाहने शाके रामचंद्रायभूमिते । १७१३ ॥
विरोधकृत्यूर्जकृष्णे गौरीतिथ्यां ३ रवे दिने १ ॥

संगमाख्यपुरेलेखि पुस्तं विट्ठलशर्मणा ॥
श्रोत्रियो पाभिमानेन भाषिकव्याकृतेरिदं ॥ २ ॥

प्रतिपुस्तकस्थमपि श्लोकद्वयं दुर्लभत्वप्रामाण्यप्रतिपत्तये लिख्यते।

श्रीविक्रमाद्गते वर्षे ऋषिग्रहर्तुभूमिते।
भाद्रे शुक्लदशम्यां च काश्यां च मंदवासरे॥
लिखितं बोपदेवेन गर्गवंशोद्भवेन चेति॥

References — Mss. -A-Aufrecht's Catalogus Catalogorum:- i, 410[a].
B-See Ind. Stud. X. 397.

मण्डलकारिका — Maṇḍalakārikā

No. 699 — 256 / 1886-92

Size — $8\frac{1}{3}$ in. by $4\frac{11}{16}$ in.

Extent — 13 leaves; 7 lines to a page; 24 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; borders ruled in double red lines; red ink used for topical headings; folios numbered in both margins; complete.

Age — Does not appear to be very old

Author — Not mentioned

Begins — fol. 1[b]

॥ श्रीगणेशाय नमः ॥

॥ कारयेत्सर्वतोभद्रं वेदीकोपरि सुंदरं ॥
तीर्यगूर्ध्वगतारेखा कुर्यादेकोनविंशतिः ॥ etc. as in No. 255/1886-92

fol. 2[a] इति हेमाद्रौ स्कांदे सर्वतोभद्रकारिका समाप्ताः ॥

fol. 2[b] इति हरिहरमंडलकारिका

Ends — fol. 13[b]

श्वेतेंदुः शृंखला श्वेता वल्ली श्वेतास्तथैव च ॥
भद्रं तु रक्तवर्णं स्यात पंक्ति स्यात् पीतवर्णका ॥ ६ ॥
वल्लीस्तु श्वेतवर्णा स्याच्छृंखला नीलवर्णका ॥
विश्वं रुपं तु रक्तं स्याद् ब्रह्मांडं कृष्णवर्णकं ॥ ७ ॥

पूजापंक्तिः श्वेतवर्णा । परिधिः पीतवर्णका ॥
पद्मं श्वेतं प्रकर्त्तव्यं बाह्ये सत्वरजस्तमाः ॥ ८ ॥

इति विश्वरूपमंडलं समाप्तं ॥

मण्डलकारिका

Maṇḍalakārikā

No. 700

40
1892-95

Size — 8⅛ in. by 4⅞ in.

Extent — 8 leaves; 12-14 lines to a page; 30-32 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting small but clear, legible and uniform; borders ruled in single red lines; red ink used for daṇḍas and topical headings; folios numbered in right-hand margins; edges of some folios slightly worn out; complete.

Same as No. 255 / 1886-92.

Age — Does not appear to be very old

Author — Not mentioned

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

अथ मंडलकारिका लिख्यते

॥ कारयेत्सर्वतोभद्रं वेदिकोपरि सुंदरं ॥
तीर्यगूर्ध्वगता रेखा कुर्यादेकोनविंशतिः ॥ १ ॥ etc.

fol. 1*a* इति सर्वतोभद्रमंडलं ॥ १ ॥

fol. 2*b* इति हरिहरमंडलं बृहत् ॥ १४ ॥

Ends — fol. 8*b*

मंडलं देवतारूपं तस्मादपि च मंडले
चतुर्भुजं प्रकर्तव्यं नांतरं देवमंडले १५
कुर्वंदुःखमवाप्नोति रविचंद्रविभूषितं
शेषनागफणाकारं लिखेदीशानकोणके १६

एवं मंडलमालिख्य ततः कुर्याच्च पूजनं-

मण्डलसाधनी

Maṇḍalasādhanī

No. 701

255
1886-92

Size — 8⅝ in. by 3⅛ in.

Extent — 6 leaves; 9 lines to a page; 3_ letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting small but clear, legible and uniform; borders ruled in double black lines; red pigment used for marking topical headings; yellow pigment used for corrections; edges slightly worn out; complete.

Age Appears to be old

Author — Not mentioned

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥

सर्वमंडलसाधनी लिख्यते ।

कारयेत्सर्वतोभद्रं वेदिकोपरि सुंदरं ।
तिर्यगूर्ध्वगता रेखाः कुर्यादेकोनविंशतिः । १ ।

खंडेदुस्त्रिपदा कोणे शृंखला पंचकोष्टकाः ।
एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥

चतुर्विंशत्पदा वापी परिधिर्विंशतिः पदैः ॥
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं । etc.

fol. 1*b* इति सर्वतोभद्रमंडलं ॥

fol. 2*a* इति हरिहरमंडलं ॥२॥

fol. 2*b* इति लतालिंगोद्भवं मंडलं ॥३॥

Ends — fol. 6*b*

इति सूर्यव्रतमंडलं १३॥

प्रागुदीच्या गता रेखा कुर्याच्च सप्तविंशतिः ।
खंडेदुस्त्रिपदा कोणे शृंखला नवभिः पदैः ।
वल्ल्येकोनविंशत्या वापी चतुर्विंशतिभिः ।

भद्रं नवपदैः कार्यमीश्वरश्चाष्टविंशतिः ।
पृष्ठं षोडशभिः कार्यं परिधिर्विंशतिः पदैः ।
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं शुभं ।
चतुर्लिंगोद्भवं शैवं मंडलं व्रतसिद्धिदं ॥

इति चतुर्लिंगोद्भवं मंडलं इति सर्वमंडलसाधनी समाप्ता ॥ शुभमस्तु ॥
श्रीरामः शरणं ममेति परमो मंत्रः ॥

मन्त्राक्षताप्रयोग — Mantrākṣatāprayoga

No. 702 — 257 / 1886-92

Size — 8⅜ in. by 3 9/16 in.

Extent — 8 leaves; 11 lines to a page; 30 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting small and careless but clear and legible; borders ruled in double black lines; red pigment used for marking; yellow pigment used for corrections; edges worn out; folios numbered in both margins; complete.

Age — Appears to be old

Author — Not mentioned

Begins — fol. 1*a*

... इदमग्नेसामचास्तां सैव नाम ऋगासीद् ... नाम सा वा ऋक्सामोपावादन्मिथुनसंभवा ... प्रजात्या इति नेत्यब्रवीत्सामज्यया अन्वातो मम महिमेति ते द्वे शूत्वोपावदतां तेन प्रति चन समवदत्तास्तिस्रो भूत्वोपावसंस्तस्तिसृभिसमभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिस्तुवंति etc.

Ends—fol. 7*b*

अक्रीतोस्य सोमस्यान्नास्यैतेमुष्मिंलोके सोम ँ रक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति क्रीतोस्य सोमो भवत्येतेस्यामुष्मिंलोके सोम ँ रक्षंति । पर्याप्त्या अनंतरायाय सर्वस्तोमोतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति । इति मंत्राक्षता ॥

On fol. 8*b* we have :—

पंचनदान्वयलक्ष्मीनृसिंहभट्टसुतरघुरामस्य पुस्तकमद मंत्राक्षतामं पत्र ८

महारुद्रपद्धति Mahārudrapaddhati

No. 703 159/1880-81

Size — 9⅞ in. by 4½ in.

Extent — 19 leaves; 7 lines to a page; 25-28 letters to a line.

Description — Country paper; Devanāgarī characters with पृष्ठमात्रा's; old in appearance; handwriting clear legible and uniform; borders ruled in two double black lines; red pigment used for marking; edges slightly worn out and moth-eaten; folios numbered in right-hand margins; fol. 1 missing; incomplete.

Age — Appears to be old

Author — Not mentioned

Begins abruptly — fol. 2a

...युक्ता वेदशास्त्रविचक्षणाः ॥
तांन्सर्वान्प्रणिपत्याहं रुद्रयज्ञं समारभे ॥ ६ ॥
ॐ नमो रुद्राय ॥ अथ महारुद्रपद्धति ॥
सुदिने शोभने चंद्रे विष्ट्यादिदोषवर्जिते ॥
ब्राह्मे मूहुर्त्त उत्थाय शुचिः प्राणिन्नियंम्य च ॥ १
गुरो रुद्राय चरणौ नत्वा नद्यादिकं व्रजेत् ॥
सूत्रोक्तविधिनाशौचपूर्वं स्नानं समाचरेत् ॥ २ ॥ etc.

Ends — fol. 20b

गच्छ त्वं भगवन्नग्ने स्थानमंडपमध्यतः ॥
हव्यामादाम देवेभ्यः शीघ्रं देहि प्रसीद मे ।
